**19E**

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत विशारद (बी.ए.) – बहिःस्थ**

**परीक्षा : डिसेंबर – २०२३**

**सत्र ५ वे**

**विषयः व्याकरण – ५** (19E451)

**दिनांक : ०५/१२/२०२३** **गुण : ८०** **वेळ : स.१०.०० ते १.००**

**सूचना : १) उजवीकडील अंक त्या प्रश्नांचे गुण दर्शवितात. २) सर्व प्रश्न अनिवार्य.**

**प्र.१. सूचनानुसारं कुरुत।**

**१) रूपपरिचयं लिखत। (केषाञ्चन पञ्च रूपाणाम्)** **(०५)**

१. आसीत् २. नक्ष्यति ३. षण्णाम् ४. वाक्षु
५. चन्द्रमसा ६. दत्स्व ७. ध्वन्ति ८. अहनि

**२) पञ्च रूपाणि लिखत।** **(०५)**

पथिन् – प्रथमाविभक्तेः एकवचनम्
अदस् – पुं. चतुर्थीविभक्तेः एकवचनम्
चतुर – स्त्री, प्रथमाविभक्तेः बहुवचनम्
गो – षष्ठी बहुवचनम्
कृ (प प.) लङ् लकारस्य प्र. पु. एकवचनम्
श्रु (आ. प.) लोट् लकारस्य म. पु. एकवचनम्
क्री (प. प.) लट् लकारस्य प्र. पु. एकवचनम्
दा (आ. प.) लट् लकारस्य प्र. पु. बहुवचनम्

**३) सन्धिविच्छेदं कुरुत। (केपाञ्चन त्रयाणाम्)** **(०३)**

१. कुतश्चिद् २. तस्मिंस्तरौ ३. त्वयोपास्यानि
४. नैकेनापि ५. नास्त्युद्यमसमः

**४) त्रीन् सन्धीन् कुरुत।** **(०३)**

१. तत्+लयः २. प्रथमः अध्यायः ३. शिशुः+हसति
४. अहः+अहः ५. एतत्+मुरारिः

**५) समासविग्रहं कृत्वा तेषां नामानि लिखत। (केषाञ्चन चत्वारि समासरूपाणि)** **(०४)**

१. मातापितरौ २. कुपुत्रः ३. निर्मक्षिकम्
४. राज्यलोभम् ५. नवरात्रम् ६. द्वियमुनम्

**प्र.२. निम्नलिखितेषु द्वौ परिच्छेदौ माध्यमभाषया अनुवादं कृत्वा लिखत।** **(१०)**

१. अस्ति कस्मिंश्चित् समुद्रोपकण्ठे महाजम्बुपादपः सदाफलः। तत्र च रक्तमुखो नाम वानरः प्रतिवसति स्म। तत्र च तस्य तरोरधः कदाचित् करालमुखो नाम मकरः समुद्रजलसलिलान्निष्क्रम्य तीरोपान्ते निविष्टः। ततश्च रक्तमुखेन स प्रोक्तः भो भवानभ्यागतोऽतिथिः। तद् भक्षयतु भवान् मया दत्तान्यमृतकल्पानि जम्बूफलानि इति। एवमुक्त्वा तस्मै जम्बूफलानि प्रयच्छति।

२. रत्नैर्महार्हैस्तुतुषुर्न देवा न भेजिरे भीमविषेण भीतिम्। सुधां विना न प्रययुर्विरामं न निश्चितार्थाद् विरमन्ति धीराः।। यदा किञ्चिज्ज्ञोऽहं द्विप इव मदान्धः समभवं तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः। यदा किञ्चित् किञ्चिद् बुधजनसकाशादवगतं तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः।

३. आसीद् एकस्मिन्नगरे महाधनो नाम्ना एकः संपन्नः श्रेष्ठी। विविधानि सुखानि भुञ्जानः सः शरीरस्य दुर्बलतया स्वल्पमपि सुखं न विन्दते। अथैकदा स विहारार्थं वाहनेन नगराद् बहिः उद्यानम् अगच्छत्। तत्र सः कमपि दृढाङ्गं कर्मकरम् अपश्यत्। तस्य आहारमुद्यमं विश्रामं च दृष्ट्वा विस्मयाकुलः सः अचिन्तयत्। – अहो अस्य दरिद्रस्य कर्मकरस्य दैवानुग्रहः। स्पृहणीयमस्यारोग्यम् तत्पृच्छामि तत्कारणं येनाहमपि लप्स्ये तादृशमारोग्यम् इति। अथ तेन पृष्टः स कर्मकरोऽनुपद्मेवाह– परिश्रमो मिताहारो द्वे एते औषधे मम। नित्यं ते सेवमानस्य व्याधिभ्यो मे भयं कुतः।।

**प्र.३. अधोनिर्दिष्टेषु केषुचिदेकं विषयमाश्रित्य संस्कृतभाषया निबन्धं लिखत।** **(१०)**

१. रामायणम्  २. कविकुलगुरुः कालिदासः  ३. विद्याधनं सर्वधनप्रधानम्

**प्र.४. अधोनिर्दिष्टेषु केषुचिदेकं विषयमाधित्य** **(१०)**

१. अकथितं च।
२. कर्तृकरणयोस्तृतीया।
३. सह सुपा।
४. प्रथमानिर्दिष्टं समास उपसर्जनम्।
५. नस्तद्धिते।
६. षष्ठी शेषे।
७. समर्थः पदविधिः।

**प्र.५. लघुसिद्धान्तकौमुदीमनुसृत्य अव्ययीभावसमासं सविस्तरं सोदाहरणञ्च स्पष्टयत। प्रथमाविभक्तेः अर्थान् सोदाहरणं सविस्तरं विशदीकुरुत।** **(१४)**

**प्र.६. द्वौ टिप्पण्यौ लिखत।** **(१०)**

१. सम्प्रदानकारकम्
२. केवलसमासः
३. त्रिविधः आधारः
४. पञ्चमी विभक्तिः

----------